॥रोमांचोद्गम एव सर्षपकणाः पाणी पुनः पल्लवौ स्वांगैरेव गृहं प्रियस्य विज्ञातस्तन्व्याकृतं मंगलम्॥ अत्राग
च्छतः प्रियस्य यं वंदनमालिकादिमंगलक्रियामानः परितोषहेतुस्तस्यास्तन्व्या इंगिताकारैरेव यन्निर्वर्तीने
सोयमाकस्मिकः स्वबुद्धिपूर्वकश्च तत्सहकारिकारणतारूढैव हेतुश्च समाहितभेदः॥ ॥भ्रांतिर्विपर्य
यज्ञानं द्विधा सापि प्रपञ्च्यते॥ अतत्त्वे तत्त्वरूपा च तत्त्वे चातत्त्वरूपिणी॥ ॥अतत्त्वे तत्त्वरूपा त्रिविधा सापि
पच्यते॥ अबाधिता बाधिता च तथा कारणबाधिता॥ क्वातत्त्वे तत्त्वरूपिणी॥ अतत्त्वे तत्त्वरूपा त्रिविधा सा
पि पच्यते। अबाधिता बाधिता च तथा कारणबाधिता॥ तत्रातत्त्वे तत्त्वरूपाबाधिता यथा॥ मोह विरमे स
रोसं थोरत्थणाणं उल्लेसु बहूणं जेण करिकुंभसंभावणाइ दिट्ठी परिट्ठविआ॥ अत्र सुरवधूस्तनेम

१३२ उल्लेकरिकुंभत्वेन गृहीतैतत्स्वरूपेयन्निःविध्येवतत्सारोपणं न चानंतरं बाधकोपन्यासकृतस्तेनेयमबाधि
133 ता च्युतत्वेन तत्स्वरूपाभ्योतिः॥ अतत्वेन तत्स्वरूपाबाधिता यथा॥ हसिअं सहत्थतालं सुक्कवडं उअवगएहिं प
हिएहिं॥ पत्तप्फलसारिच्छे उड्डीणे पूसवंदम्मि॥ अत्र पत्रफलितो यं न्यग्रोधः इत्यतत्स्वरूपेन तत्स्वबुद्धावुत
न्नो यां पउअरकालमपच्चतानिः फलता मस्य यस्तेनेयमतत्त्वे तत्स्वरूपाख्याबाधिताभ्योतिः। अत्र तत्त्वे
तत्स्वरूपाकारणबाधिता यथा॥ कनककलशात्स्वच्छे राधापयोधरमंडले नवजलधरश्यामात्मद्युतिं प्र
तिबिंबितां मृ॥ असितसितचयंप्रांतभ्रांतासामुहुर्मुहुः क्षिपन् जयति जनितव्रीडाहासः प्रियाहसितो ह १३२
रिः॥ अत्रश्यामायामात्मद्युतावसितसितचयंप्रांतबुद्धिरतत्वे तत्स्वरूपा प्रियाहसितेन च कारणेन य

त्वबाधितासेषा अतत्वेन तत्वरूपाकारणबाधितायांतिः ॥ अतत्वरूपात् तत्वे यामापित्रे विध्यसिद्धये ॥ हा
नोपादानयोर्हेतुरुपेक्षायाश्च जायते ॥ तत्र तत्वैः तत्वरूपाहानहेतुर्यथा ॥ सो मुद्धमओ मअतण्हिआ
हिं तह दूमिओ तुह आसाहिं ॥ जह सब्भावमईएण विणाईएण परम्मुहो जाओ ॥ अत्र पारमार्थिकीष्वपि नदी
षु मृगतृष्णाप्रतारितः सन् मुग्धमृगः पयः पातुं प्रतिपद्यते अस्कृतस्तजनितेनेवं तत्वेप्यतत्वरूपाहानहेतु
र्भीतिः । तत्वे अतत्वरूपोपादानहेतुर्यथा ॥ समर्थये यत्प्रथमं प्रियां प्रति क्षणेन तन्मे परिवर्त्तितन्यथा
अतो विनिद्रे सहसा विलोचने करोमि न स्पर्शविभावितप्रियः अत्रांगीकृतलतारूपोर्वशीपरिष्वंग
सुखनिमीलिताक्षस्य पुरूरवसः आपाताविर्भूतसत्यरूपायामपि तस्यां येयं पूर्वानुभूतैवंविधानेक

१३४ विधविमलंमसंभावनयानयनयोरुन्मीलनबुद्धिः सेयंतत्वेप्यतत्त्वरूपोपादानहेतुर्भ्रांतिः ॥ तत्वेप्यतत्व
रूपोपेक्षाहेतुर्यथा ॥ चित्रिकिंसयाकृत्रिमपत्रिपंक्तेः कपोतपालीषु निकेतनानां मार्जारमप्यापतितंनिश्च
134 लांगयस्यांजनः कृत्रिममेवमेने ॥ अत्र मृतत्वरूपेपिमार्जारे कृत्रिमोयमितिबुद्धौजातायां तस्यां प्रयोजन
त्वेनयदुपेक्षणं सेयंतत्वेप्यतत्त्वरूपोपेक्षाहेतुर्भ्रांतिः ॥ ॥भ्रांतिमान्भ्रांतिमालाच भ्रांतेरतिशयश्च
यः ॥ भ्रांत्यन्यव्यवसायश्च भ्रांतिरेवेतिमेमतम् ॥ तत्र भ्रांतिमान्यथा ॥ कपाले मार्जारी पय इति करा
न्लेढि शशिनस्तरुच्छिद्रप्रोतान्बिसमितिकरी संकलयति रतांते तल्पस्थान्हरति दयिताप्यंशुक १३४
मितिप्रभामत्तश्चंद्रो जगदिदमहो विभ्रमयति ॥ अत्रेंदुमरीचिषु पयःप्रभृतिभ्रांतिर्भ्रांतायं भ्रांतिमा

न्यामभ्रांतेरेवभेदः॥ भ्रांतिमान्यथा॥ नीलेंदीवरशंकया नयनयोर्बंधूकबुद्ध्याधरे पाणौ पद्मधिया मधूक
कुसुमभ्रांत्या तथा गंडयोः। लीयंते कबरीषु बांधवजनव्यामोहजातस्पृहा दुर्वारा मधुपाः। कियंति तरुणि स्था
नानि रक्षिष्यसि॥ अत्र युवत्यवयवेषु नयनादिषु मधुव्रतानां येषां नीलोत्पलादिबुद्धिः सेयं मालाक्रमेणो
पजायमाना भ्रांतिमाला भ्रांतेरेव भेदः॥ भ्रांत्यतिशयो द्वेधा॥ वितर्कहेतुर्विपर्ययहेतुश्चा तयोः पूर्वमुपमा
भ्रांतिमाचक्षते द्वितीयं तु भ्रांत्यतिशयमेव। तत्राद्योपमाभ्रांतिर्यथा॥ हृतोष्ठरागैर्नयनोदबिंदुभिर्निमग्ननाभे
र्निपतद्भिरंकितं॥ च्युतं रुषा भिन्नगतेरसंशयं शुकोदरश्याममिदं स्तनांशुकं॥ अत्र शाद्वलेपि समुन्न
स्तनांशुकभ्रमस्यापहारवसः योयं सादृश्यातिशयाधितो वितर्कः सेयमुपमाभ्रांतिः॥ भ्रांत्यतिशयो यथा

१३५ दिश्याद्धूर्जटिजूटकोटिसरितिज्योत्स्नालवोद्भासिनी शाशांकी कलिकाजलभ्रमिवशान्नीत्वाग्रहं ष्टनखामुद्
135 म्रां यां चेचच्छफरीभ्रमेणमुकुलीकुर्वन्क्षणालीमुडुमुत्यल्लक्ष्यमहिर्जिघृक्षतितमामाकुंचनभ्रांतवैः॥
अत्रगंगांभः प्रतिफलितारजनिकरकलामालोकपतो वासुकेर्ययं शफरीभ्रमेणमुकुलीकुर्वन्क्षणा
ली शफरीयमित्यध्यासिना विपर्ययबुद्धिः सोयं भ्रांत्यतिशयो नाम भ्रांतेरेव भेदः॥ भ्रांत्यनध्यवसायोपि
द्विधा॥ सालंबनो निरालंबनश्च तयोः सालंबनो यथा विरहिणीहिअअकअंतहिं णिस्सासअइतकवणि
ग्गइज्जइ अलिणिवहेहिं चिंतेनचूअवणि अहतासुविमअंदेहिं सो संदाणिअइ जहणकलंबवण १३५
अंबणजंबूजाणिअइ॥ न कदंबो नो म्लानजंबूरिति ज्ञायत इति त्रयाणामेवावलंबनभूतत्वात्साल

वनो नामायं भ्रान्त्यनध्यवसायो भ्रान्तिभेदः॥ निरालंबनो यथा॥ उभौ रंभास्तंभावुपरि विपरीतौ कमलयो
स्तदूर्ध्वं रत्नाश्मस्थलमथ दुरूहं किमपि यत ततः कुंभौ पश्चात्किसलयकंदलमपि तदन्विंदाविंदी
वरमथ कराः किंपुनरिदम॥ अत्रौर्वादिषु पूर्वस्वपदेषु उत्पन्ने रंभास्तंभभ्रांते योयमेतत्समुदाये किमि
दमित्यालंबनं विनाकृतोनध्यवसायः स एष निरालंबनो नाम भ्रान्त्यनध्यवसायो भ्रान्तेरेव भेदः॥ ॥ ऊहो
वितर्कः संदेहनिर्णयांतरधिष्ठितः॥ द्विधासौ निर्णयांतश्चानिर्णयांतश्च कीर्त्यते॥ तत्त्वानुपात्यतत्त्वानुपा
तीयश्चोभयात्मकः। सनिर्णयांतस्तत्र मिथ्या मिथ्योभयात्मकः॥ तेषु निर्णयांतस्तत्त्वानुपाती यथा॥ मैना
कः किमयं रुणद्धि गगने मन्मार्गमव्याहतं शक्तिस्तस्य कुतः स वज्रपतनाद्भीतो महेंद्रादपि॥ तार्क्ष्यः

१३६ सोपिसमंनिजेनविभुनाजानातिमांरावणंत्वाः ज्ञातंसजटारेषजरसाक्लिष्टोवधंवांछति॥ अत्रनिरूपि
तलक्षणोवितर्केजटायुरेषइतितत्त्वानुपातीनिर्णयांतोवितर्कः सएवातत्त्वानुपातीयथा॥ अस्याःसर्गवि
126 धौप्रजापतिरभूच्चंद्रोनुकांतिप्रदः शृंगारैकनिधिःस्वयंनुमदनोमासोनुपुष्पाकरः॥ वेदाभ्यासजडःकथंनुवि
षयव्यावृत्तकौतूहलोनिर्मातुंप्रभवेन्मनोरममिदंरूपंपुराणोमुनिः॥ अत्रकिमिदंरूपंनिर्मातुंयथोक्तःपु
राणोमुनिःप्रभवेदतश्चंद्रादिष्वन्यतमेनप्रजापतिनाभवितव्यमित्यतत्त्वानुपातित्वादतत्त्वानुपातस्यनि
र्णयांतोवितर्कः॥ सएवोभयात्मकोयथा॥ चित्रेनिवेश्यपरिकल्पितसत्वयोगाद्रूपोच्चयेनरचितामन
साकृतानु स्त्रीरत्नसृष्टिरपराप्रतिभातिसामेधातुर्विभुत्वमनुचिंत्यवपुश्चतस्याः॥ सोयंतत्त्वानुपाति १३६

स्वार्तत्वानुपातित्वाच्चोभयात्मानिर्णयांतो वितर्कः। अनिर्णयांतो मिथ्यारूपो यथा॥ अद्रेः शृंगं हरति
पवनः किंस्विदित्युन्मुखीभिर्दृष्टोछ्रायपश्यकितचकितं मुग्धसिद्धांगनाभिः। स्थानादस्मात्सरसनिचु
लादुत्पतोदङ्मुखः खं दिङ्नागानां पथि परिहरन्स्थूलहस्तावलेपान्। अत्र किमिदमद्रेः शृंगं पव
नो हरतीति मेघं प्रतिकल्पनाया मिथ्यात्वाहस्तेनश्चानिर्णयादनिर्णयांतो मिथ्यारूपो वितर्कः। स
एवामिथ्यारूपो यथा॥ अयमसौ भगवानुतपांडवः स्थितमवाङ्मुनिना शशिमौलिना॥ समधिरूढ
मनेन नु जिष्णुना स्विदिति वेगवशान्मुमुहे गणैः॥ अत्र भगवत्पार्थयोः मिथ्यारूपत्वेन वेगवत्वादे
कस्यानिर्णयांतो मिथ्यारूपो वितर्कः। अनिर्णयांतउभयात्मा यथा॥ मायास्विदेषा मतिविभ्रमो

१३० वाध्वस्त्वंतुमेवीर्यंश्रुताहमन्यः॥गौरीवमुक्ताहियथापुरोमेपराक्रमंतेनचारःकिराते।अत्रमायादीनांविक
ल्पानांमिथ्यारूपत्वातममज्ञाणः किरातेतस्याप्रियंतइत्यस्यामिथ्यारूपत्वादनिर्णयांतुत्वाच्चायमनिर्ण
137 यांतोऽभयरूपोवितर्कः॥ ॥वस्तुनातिरस्कारोवस्तुनामीलितंस्मृतम्।पिहिताऽपिहितेचैवतद्गुणःतद्गु
णोचततः॥अत्रमीलितमभिधीयमानगुणेनप्रतीयमानगुणेनचवस्तुनासंभवति॥तयोराद्योयथा॥एतो
विलासच्चविश्लेषोगोस्तेपसस्त्रपल्लवारुणच्छायो॥मज्जणतंवेसुमच्छोतहअमतंवेसुलोअणेसुअ
मरिसो॥अत्रमज्जनताम्रयोर्लोचनयोर्मदरागःमदाताम्रयोःकोपानुरागःसाक्षादभिधीयमानेनैववस्तु १३०
णानतिरस्क्रियमाणोनिदर्शितइत्यभिधीयमानेनवस्तुनैतन्मीलितम्॥प्रतीयमानेनयथा।पिच्चद

सरोणसुहरसमउलिआइं जइ से ण होंति णअणाइं ॥ ताकेण कस्सरइ अलक्खिज्जइ कुवलअं
तिस्सा। अत्र प्रियदर्शनेसुखेनमुकुलितयोरवलोचनयोस्तस्याः कर्णकुवलयंलक्ष्यते नत्वमुकु
लितयोरितिवस्तुनावस्त्वंतरतिरस्कारः प्रतीयमानगुणतयोपपादितइतिप्रतीयमानगुणेनवस्तुना
मीलितमिदम् ॥ पिहितंयथा ॥ पाअडिअणेहसब्भावविब्भमंतीअजहतुमंदिट्ठो। संवरणावावडाए
अन्नोविजणोतहच्चेअ अत्रप्रकटितस्नेहविभ्रमंतथात्वामवलोक्यानेनतदन्योजनोज्ञानालिंगितिसर्व
त्रस्निग्धदृष्टिपातेनपिहितमप्येतन्मीलितमेदएव। अपिहितंयथा ॥ दिट्ठाइजंणदिट्ठोआलविअ
एविजन्नआलविओ। उवआरोजणकओतंविअकलिअंछइल्लेहिं। अत्रदृष्टयायन्नदृष्टः सं

१३८ भाषितयापत्न्यासंभाषितःत्वचाभ्यागतोपचारोविहितस्तेनतदनुरागःपरंनपिहितःप्रस्फुतच्छादनेनच्छे
कानांप्रकटितरस्यपिहितारव्योयंमीलितभेदः॥तद्गुणोयथा॥गोरंगउतरुणीअरुणाजोह्णाइअहि
सारइसिचंत्तोवच्छपडिछेओवल्लहवहरर॥तच्छाअहिहिपुणचह्निअउसामलंगेतिहंमअणुमं
तिअहिम॥अत्रगोरांगस्तरुणीजनःसितत्वेपथ्योज्योत्स्नायांश्यामलस्तुनीलत्वेपथ्यःतस्याःछाया
स्तुगच्छतीतितद्गुणाश्रयमीलनात्तद्गुणस्यमीलितमिदम्॥अतद्गुणोयथा॥कर्कंधूफलमुच्चिनो
तिशबरीमुक्ताफलाकांक्षिणीकूडालूककदंबकस्यपुरतःकाकोपिहंसायते॥कीर्त्यातिधवलीकृ १३८
तेत्रिभुवनेक्ष्मापाललक्ष्मीपुषःकैस्तंवीक्ष्यबलोयमित्यपहितश्रीउंशीनैर्जल्पति॥अत्रकर्कंधूफ

लानामपगतनिजगुणत्वादतद्गुणादतद्गुणस्वयंमीलितमिदम्॥ ॥सदृशादृष्टचिंतादेरनुभूतार्थवि
दनम्॥स्मरणंप्रत्यभिज्ञानसमावपिनतद्भिदि॥तत्रसदृशार्थेयथा॥अदृश्यंतपुरस्तेनखेलाःखं
जनपंक्तयः॥अस्मर्यंतविनिःश्वस्यप्रियानयनविभ्रमाः॥अत्रखंजनपंक्तिदर्शनात्तत्सदृशप्रियान
यनविभ्रमस्मरणात्तत्सदृशदृशंनजंस्मरणमिदम्॥अदृष्टाद्यथा॥मुनिसुताप्रणयस्मृतिरोधिना
ममवियुक्तमिदंतमसामनः॥मनसिजेनसखेप्रहरिष्यताधनुषिचूतशरश्चनिवेशितः॥अत्रमुनिसु
ताप्रणयप्रतिरोधिनातमसामेमनोवियुक्तमित्यदृष्टकृतंस्मरणमिदम्॥चिंतयायथा॥पुरायत्रस्रो
तःपुलिनमधुनातत्रसरितांविपर्यासंयातोघनविरलभावःक्षितिरुहाम्॥बहोर्दृष्टंकालादपरमि

१३९ कुञ्जातं वनमिदं निवेशः शैलानां तदिदमिति बुद्धिं हृदयति॥ अत्र प्रत्यक्षेष्वपि स्रोतस्तरुविपिनादिषु
स्मरणस्य चिंताजन्यत्वादिदं चिंतोद्भूतं स्मरणम्॥ आदिग्रहणात्सप्रयत्नाद्यथा॥ दर्शनपथमायाता
साक्षादिव तन्मयेन हृदयेन। स्मृतिकारिणा त्वया मे पुनरपि चित्रीकृता कांता॥ अत्र परकृतात्प्रयत्न
विशेषाच्चिंतायाः प्रवृत्तत्वादिदमपि स्मरणमेव॥ स्वप्नाद्यथा॥ जाने स्वप्नविधौ ममाद्य चुलुकोत्सेकं पु
रस्तादभूत्स्मत्पूषपरिवेषमंडलमिव ज्योत्स्नाप्रसन्नं महः॥ तस्यांतर्नववृत्तिस्फुटीकृतशरच्चंद्रप्रभे रंग
के दृष्टो कोप्यबलाबलात्कृतवती सामन्मथं मन्मथम्॥ अत्र स्वप्नस्य चिंतादिजन्यत्वात्स्वप्नस्मृतिराप १३९
स्मरणमेव॥ प्रत्यभिज्ञानं यथा॥ गृहीतोयः पूर्वं परिणयविधौ कंकणधरः सुधामूर्तेः पादैरमृतशि

त्रिभिर्यः परिचितः ॥ स एवायं तस्यास्तदितरकरौपम्यसुभगो मया लब्धः पाणिर्ललितलवलीकंदल
निभः ॥ अत्र गृहीतो यः पूर्वं स एवायं तस्याः पाणिरिति प्रत्यभिज्ञानमपि स्मरणमेव ॥ ॥ अभिप्रायानुकू
ल्येन प्रवृत्तिर्भाव उच्यते ॥ सोऽद्रेको यत्र निरूढे दृश्यै कृतस्याभितश्श्रमः ॥ तेनैकतः सोऽद्रेको यथा ॥ गेहलपलोएहि इ
मं विस्मासिअ वअणापि अस्सत्त अप्पैर घरणी सुअस्स पर मुग्धिस्सद तं जु अलेकि अंबोरं ॥ अत्र सुत
स्य दंतोद्गमाद् अहमुपभोगयोग्यास्मीति गृहिण्या एवमभिप्रायः प्रकर्षविकाशिनयनतयोद्घाटितेन पुनः
प्रस्फुरित्येकतः सोऽद्रेकोऽयं भावः ॥ अभितः सोऽद्रेको यथा ॥ सालोएच्चिअ सूरे घरिणी घरसामिअस्स
घेत्तूण लोच्छंतस्स वि पाए धुअइ हसंती हसंतस्स ॥ अत्र सालोक एव सूर्ये गृहपतेर्गृहागमनं गृहि

१५० ण्याश्च यस्मादधावनं तदावाभ्यामद्य वेश्मनो न निर्गन्तव्यमिति भावः स च द्वयोरपि हासेनाभितः उद्दिश्य
तदस्यभिहितः सोऽद्रेशोयं भावः ॥ एकतो निरुद्धे दोषपथा सालिवणगोविआए उठी वंत्री अप्पमविदा
इ ॥ सव्वंगसुंदरीसविपहिआ अच्छीइ पेछंति ॥ अत्रातिसौंदर्येण देव्यास्त्वां शालिवनगोपिकामालोक
यतां पथिकानां तदक्षिनिरीक्षणे अयमभिप्रायः शालिवनतिरस्कारेण देवमानुषयोर्विशेषभूतः पश्यामेव
भूमिस्पर्शी भूम्यस्पर्शी वा न लक्ष्यत इति तदक्षिणी एव पश्यामः यदीयं निमिषति तदा मानुषी यद्यन्निमि
षति तदा देवी यान्निति सर्वांगसुंदर्या अपि पथिकानामेव जायमानो नेह केनचित्कर्मणा इद्यतदस्य कतो १५०
निरुद्धे दक्षायं भावः ॥ अभितो निरुद्धे दोषपथा ॥ गोलाअडट्ठिअं पेच्छिऊण गहवेरसुअं हलिअसोह्ला

आरन्नाउन्नरिउं दुक्कुत्तुन्नाराइ पञ्जवीए॥ अत्रागच्छंतीं हालिकस्नुषां दृष्ट्वा गृहपतिसूनोर्गोदावरीतटे यद्वस्था

नं यश्चतमवलोक्य तस्यादुरुत्तरमार्गेणावतरणारंभस्तत्रायं तयोरभिप्रायः हस्तावलंबदानेनावयोरंगसंगसं

पाद्यतामितिमत्वाभितो हृद्योरपिजायमानो नेहकेनचित्कर्मणोद्भिद्यतइत्यभितो निरुद्भेदश्चायं भावः॥ ॥

हृद्यं सूक्ष्मं चभिद्येत न हि भावात्कथंचन॥ हृद्योदाहरणं तत्र तैरिदं प्रतिपाद्यते॥ हिअअएरो सुन्निसंपाअप्प

हरंसिरेणपत्थंतो णाह उंदञ्जोमाणं सिणीए अथोरं सुअं रुअं॥ अत्र हृदयेउ ह्णपाद प्रहारं यद्यं त्रिरसा

प्रार्थितवान्यच्च तयासौ न ताडितस्तत्र हृदयेवल्लभावसतीतिभावः सच प्रार्थनारोदनाभ्यामुद्भिद्यमानः सो

द्भेदो भावो हृद्य इत्युच्यते॥ ॥निरुद्भेदस्तयो भावः समसूक्ष्मस्तैर्निगद्यते॥ इंगिताकारलक्ष्यात्मसूक्ष्मात्सा

१४१ भूमिकांतरं॥ यथा॥ कदा मे संगमो भावी त्याकीर्णे वक्तुमक्षमम्॥ अवेत्य कांतमबला लीलापद्मं न्यमीमिलत्॥
अत्र वक्तुमक्षमतायामिंगिताकारयोरप्रतीयमानत्वाज्ज्ञावावगते भूमिकांतरमिदं भवति॥ पद्मसंमीलनाच्चा
त्रस्तचितो निशि संगमः॥ आश्वासपि तु मिष्टं स्या प्रियमंगजपाडितं॥ अत्रानुकार्यानुकरणे अपि भूमिकांत
रितेएव भवत इति सोयं निरूढो भाव एव सूक्ष्म इत्युच्यते॥ ॥प्रत्यक्षमक्षजं ज्ञानं मानसं चाभिधीयते॥ स्वानु
भूतिभवं चैवमुपचारेण कथ्यते॥ तत्राक्षजं द्वेधा॥ युगपदेकशश्च॥ तयोर्युगपद्यथा॥ क्रांतकांतवदनप्रतिबिं
बमेभंध्यस्वादुताश्रव्यत्वशैत्यानां हृक्ये घ्राणरसनश्रवणत्वगिंद्रियप्रत्यक्षता प्रतीयते॥ एकशो यथा॥ मं १४१
दमंदविगलत्त्रपमीषच्चक्षुरुल्लसितपक्ष्म दधत्या॥ वीक्ष्यते स्मशनकैर्नववध्वा कामिनो मुखमधोमुख

मध्येमुखयैव॥ तदेतच्चाक्षुषं॥ एवं श्रावणादीन्यप्युदाहरणीयानि॥ मानसमपि द्विधा॥ सुखादिविषयम
नुभूतार्थविषयं च॥ तयोः सुखादिविषयं यथा॥ अस्तोकविस्मयमविस्मृतपूर्वहृत्तमुद्भूतनूतनभयज्वरजर्ज
रं नः॥ एकक्षणत्रुटितसंघटितप्रमोदमानंदशोकशबलत्वमुपैति चेतः॥ एतन्निगदेनैव व्याख्यातम्॥ अ
नुभूतार्थविषयं यथा॥ पिहितेवासागरेतममसिस्रची मुखाग्रसंभेद्ये॥ मयि च निमीलितनयने तथापि कांतामु
खं व्यक्तम्॥ इदमपि नातिदुर्बोधमिति न व्याख्यातम्॥ स्वानुभूतिमवद्विधा॥ मिथ्यात्मकममिथ्यात्मकं च॥
तयोर्मिथ्यात्मकं यथा॥ अथ दीर्घतरं तमः प्रवेक्ष्यन्सहसा रुग्णारयः ससंभ्रमेण॥ निपतंतमिवोष्णरश्मिमुर्व्या
वलीयीभूततरुं धरां च मेने॥ तदिदमिंद्रियेषु मनसि चानवतिष्ठमानमात्मन्येवावतिष्ठते॥ अमिथ्यात्मकं

१५२ यथा॥ मनःप्रसक्तचित्तैस्तविधमवधार्यांतमरुतः प्रहृष्यद्रोमाणः प्रमदसलिलोत्संगितदृशः॥ यदालोका
ह्लादंह्रदइवनिमज्यामृतमयेदधसंतस्तत्वंकिमपियमिनस्तत्किलभवान्॥ अत्र स्यात्मविषयताव्यक्तैवयो
गिभिरुद्गीयते॥ ॥लिंगाद्यल्लिंगिनो ज्ञानमनुमानंतदुच्यते पूर्ववच्छेषवच्चैवदृष्टंसामान्यतश्चयत॥ फ
लसामर्थ्यभेदेनद्विधेतद्भिद्यतेपृथक्॥ उदाहरणमेवैषांरूपवक्त्यैभविष्यति॥ तेषु। यत्रकारणंदृष्ट्वाकार्य
मनुमीयतेतत्पूर्ववद्यथा॥ अविरलविलोलजलदःकुटजार्जुननीपसुरभिवनवातः॥ अयमायातःकालो
हंतहताःपथिकगेहिन्यः॥ अत्रवर्षर्तोःकारणमनुमीयतेतच्छेषवद्यथा॥ सावज्ञमागमिष्यन्नूनंपतितो १५२
सिपादयोस्तस्याः॥ कथमन्यथाललाटेयावकरसतिलकपंक्तिरियम्॥ अत्रयावकरसतिलकपंक्तेः

कार्यभूतायाः कारणभूतं पादपतनमनुमीयते। तेनैतद्धेषः कार्यमिहास्तीति शेषवदुच्यते यत्र न कार्यं
न कारणं केवलमविनाभावमात्रं प्रतीयते तत्सामान्यतो दृष्टं यथा॥ गज्जंते खं मेहा फुल्ला णीवा पणच्चि
आ मोरा। णट्ठो चंदुज्जोओ वासारत्तो हला पत्तो॥ अत्र वर्षर्तुरविनाभूतैर्मेघगर्जितादिभिः सामान्येनैवा
नुमीयत इति सामान्यतो दृष्टमिदम्॥ तान्येतानि भावसाधनेनुमानशब्दे फलपक्षे उदाहरणानि भवंति
॥ यदा पुनः करणसाधनोनुमानशब्दः तदानुमीयते अनेनेत्यनुमानशब्देन यथोक्तं लिंगमुच्यते॥
यदाह। अनुमेयेन संबद्धं प्रसिद्धं च तदन्विते॥ तदभावे च यन्नास्ति तल्लिंगमनुमापकम्॥ तत्सूर्वं वत्तिय
था॥ अइ सहिवं कुलाविरिबुहिहिसिगोत्तस्समत्थयएच्छारं॥ अच्चंतदत्तरिदिट्ठेणसामिवलिरणेहसि

२४३ एण॥अत्रैवंप्रकारयावक्रोक्त्याएवंविधेनहसितेनोपलक्षितात्त्वमग्रतोगोत्रंहृष्यसीतिकारणतोयत्रका
येनुमानंतदिदंसामग्रीपक्षेपूर्ववदित्युच्यते॥शेषवदितियथा॥दीसइणचूअमउलंअत्ताणअवाइम
लअगंधवहो॥एत्तंवसंतमासंसहिजंतउक्कंठिअंचेअं॥अत्रोत्कंठालक्षणेनकार्येणवसंतःकारणभूतो
नुमीयतइतिसामग्रीपक्षेइदंशेषवदित्युच्यते।सामान्यतोदृष्टंयथा॥अविर्भवंतीप्रथमंप्रियायाःसो
च्छ्वासमंतःकरणंकरोति॥सन्नापदग्धस्यशिखंडिमूनोदृष्टेःपुरस्तादचिरप्रभेव॥सेयंविद्युदिवदृष्टंका
मंदस्यापिप्रथमतउपलभ्यमानाअविनाभावेनमालूस्यागमनंगमयतीतिसामग्रीपक्षेसामान्यतोदृष्टम २४३
नत॥ ॥यदाप्तवचनंतद्विज्ञेयमागमसंज्ञया॥उत्तममध्यमंचाथजघन्यंचेतितत्त्रिधा॥तत्रोत्तमंद्विधा।

विधिरूपंनिषेधरूपंच।तयोर्विधिरूपंयथा॥ददमंदानंदयांशिक्षेःस्तनपितुर्वदत्यसौ॥ददहहतिवाग्देवी
दयध्वंदत्तदाम्यत॥अत्रचएषादैवीवागनुवदतियस्तेनपितुर्ददहहतिदयध्वंदत्तदयतेतितेतत्त्वंसंशि
क्षेतदमंदानंदयामितिश्रुतेस्तदेतद्विधिरूपमाप्तवचनं॥निषेधरूपंयथा॥निवार्यतामालिकिमप्ययंबटुः
पुनर्विवक्षुःस्फुरितोत्तराधरः॥नकेवलंयोमहतोपभाषतेशृणोतितस्मादपियःसपापभाक्॥अत्रोत्त
राद्धोक्तनिषेधानुवादवद्धितत्र्युत्तरोर्वयस्यायायोग्यमपवदमानबटुनिवारणोपदेशःतस्यमहतोनाप
भाषितव्यादितिवाक्यार्थतात्पर्याद्यन्निषेधरूपआगमःतदेतदुभयमपिअवश्यानुष्ठेयत्वादुत्तमम्॥मध्य
मंद्विधा॥निर्दिष्टवक्तृकमनिर्दिष्टवक्तृकंच।तयोराद्यंयथा॥कल्याणीबतगाथेयंलौकिकीप्रतिभा

१५५ तिमे एतिजीवंतमानंदोनरंवर्षशतादपि॥ अत्रजीवन्नरः पश्यतिभद्रमिति। अयमेवार्थो निर्दिष्टवक्तृकः तदेत
त्सर्ववाक्यानां विधिनिषेधयोः पर्यवसानात्प्रमाणेषु गण्यतां यातितव्यमिति विधिरूपमाप्तवचनम्॥ द्वितीयं यथा।
अक्षेवसतिपिशाचः पिचुमंदे दिनपतिर्वटे यक्षः॥ विश्राम्यतिपद्मे श्रीः श्लिष्टतिगौरी मधूकतरौ॥ तदिदमनि
र्दिष्टवक्तृकमनादिलोकप्रसिद्धिपरंपरायातमैतिह्यम्॥ अत्रापिसर्ववाक्यानां विधिनिषेधयोः पर्यवसानोऽत्रस्मा
दक्षं न सेवेत। पिचुमंदं न निकृंतेत। वटं न छिंद्यात्। पद्मेन मूर्द्धि विभृयात्। मधूकेन पदा स्पृशेत्। इत्यध्याहारोभ
वति॥ सोयंनिषेधरूपआगमः उभयमप्येतत्त्वावश्यानुष्ठेयमिति मध्यमम्। जघन्यं द्वेधा। काम्यंनिषिद्धंच १५५
। तयोः काम्यंयथा॥ मुंडइआचुस्सकसाच्चसाहिंअपाणाणावराविइसं॥ तेल्लंपलिअत्थणीसंविकुणो

द्विपिण्डस्याप्यपणः ॥ तदेतत्सर्ववद्विधिरूपं काम्यमाप्तवचनं ॥ निषिद्धं यथा ॥ वयं बाल्ये बालांस्तरुणिमनि
यूनः परिणतावपीच्छामो वृद्धान्परिणयविधानस्थितिरियम्। त्वयारब्धं जन्मक्षपयितुमकाण्डेन विधिना
न नो गोत्रे पुत्रि क्वचिदपि सतीलाञ्छनमभूत् ॥ तदेतन्निषेधरूपं निषिद्धमेवाप्तवचनं ॥ उभयमपि चैतन्म
लकारिभिः संसृज्येत इत्यादिदोषान्नानुष्ठेयमिति जघन्यम् ॥ ॥ सदृशात्सदृशं ज्ञानमुपमानं द्विधेह तत्
॥ स्यादेकमनुभूतेर्थेऽननुभूते द्वितीयकम् ॥ तयोरनुभूतार्थविषयं यथा ॥ सर्वप्राणा त्रवणमैद्यवन्मु
कमाहत्य वक्षस्तत्संघटाद्विघटितबृहत्खण्डमुच्चण्डरोचिः। एवं वेगात्कुलिशमकरोद्व्योमविक्षत्सहस्रै
र्भर्तुर्वज्रज्वलनकपिशास्ते चरोषाट्टहासाः ॥ अत्र रामकराकृष्यमाणभग्नधूर्जटिधनुर्विमुक्तज्योतिः

१५५ टासहस्रसंकुलमाकाशं पश्यतो रावणहृतस्येयं स्वयं दृष्टे पुष्पमुद्वसः स्थलविदीर्णवंज्रशकलविस्फूर्जथु
145 षु तद्दोषादृष्टासेषु वियद्व्यापिषु तत्साहश्यबुद्धिः ॥ तदिदमनुभूतविषयं नामोपमोनं मीमांसका वर्णयंति ॥
अननुभूतविषयं यथा ॥ तारो हिरणी विज्ञानीहि ज्योतिषामत्र मंडले । समूह स्तारकाणां यः शकटाकारमाश्रि
तः ॥ अत्र यथाविधः शकटाकारस्तथाविधो रोहिणीतारसमूहाकार इत्येवमवधारितामोपदेशस्य तदाका
रतारकचक्रदर्शनादिदं तद्रोहिणीशकटमिति । येयं संज्ञासंज्ञिसंबंधप्रतिपत्तिस्तदिदमननुभूतविषयमुप
मानं नैयायिका समुन्नयंति ॥ ॥ तथाभूतार्थविज्ञानजनकत्वेन हेतुना ॥ नास्मादभिन्नेपाल्ले ख्यमुद्राबिंबा १५५
दयः पृथक् ॥ तेष्व भिन्नयो यथा ॥ वइविवरणिग्गाअदलो एरंडो साहइ व तरुणाणं । एत्थं घरे हलिअब

दृएद्दहमेत्तत्थणीवसर॥ अत्र पयोधरातिपरिणाहसूचकोत्तानप्रसारितांगुलिहस्ताभिनयसंनिभेरं उद
लसंनिवेशादर्शनात्त्वयमुद्दिष्टेपि हालिकवधूस्तनपरिणाहे पूर्वानुभूतैवंविधस्तनपरिणाहसंबंधप्रतिपत्तिस्त
दिदमनुभूतार्थविषयमुपमानमेवाभिनयइत्स्कल्लेस्यते॥ आलेख्यं यथा॥ तवालेख्ये कौतूहलतरलतन्वी विर
चितेविधायैकाचक्रं रचयतिसुपर्णसुतमधः॥ अथ खिद्यसापाणिस्खलितमपमृज्यैतदपराकरे पीछं चापं मक
रमुपरिष्टाच्च लिखति॥ अत्र यदानुभूतनायकसंदर्शनायास्तत्पालेख्यप्रदर्शनादेवंभूतः स इति विज्ञानमु
त्पद्यते गोपनार्थं च तथाभूतयोरेव देवकुलादिदृष्टविष्णुकामयोः प्रतीतिर्भवति तदेतदनुभूतार्थविषयं भव
ति। यदा पुनरननुभूतनायकादिसंदर्शनायाइत्थमात्मोपदेशः एवंभूतः सुपर्णकेतुश्च रूपातिर्भवति।

१५६ एवंभूतोमकरध्वजःपुष्पचापःकामोभवति।यादृशाविमोतादृशश्चसतेमनोरथभूमिःकेवलमस्यगरुत्मतादयो
नविद्यंतेतदातदुत्तरंकालमालेख्यगततदाकारदर्शनात्सोयंममप्रेयानितिमद्धियाकयापिलिखितो
भविष्यतीतितदुपयाम्येनंविष्णुचिह्नाभ्यामितिगरुत्मच्चक्रेधःप्रदेशहस्तयोःकेतुहस्तयोर्निवेशयति
॥अथापराप्रतिविधित्सुर्गोपयंतीप्रकाशयंतीचप्रत्यासंन्नोपमानंमन्मथाकारमाचिख्यासुःकरेपोष्यंचा
पंमकरमुपरिष्टाच्चालिखति।अत्राकृतोपदार्थयादृमास्तयोर्लोकानांसोयमितिविष्णुरितिकामइतिच
संज्ञिसंबंधप्रतिपत्त्यपःतदिदमनुभूतार्थविषयमुपमानमालेख्यमाख्यायते॥मुद्रायथा॥सचकितमि १५६
वविस्मयाकुलाभिःशुचिसिकतास्वतिमानुषाणिताभिः।क्षितिषुददृशिरेयदानिजिह्मोरुपहितकेतुरथां

गलांछनानि। अत्रचक्रध्वजांकितजिष्णुपादमुद्रादर्शनात्सेयममानुषीपादमुद्राभवतीतिसंज्ञासंज्ञि
संबंधप्रतिपत्तिस्तदिदमननुभूतार्थविषयमुपमानमेवमुदेस्तूच्यते। यदपिचादृष्टेपिजिष्णुपदेमृगीदृ
शामीदृशः सईत्यनुमानज्ञानंतदप्युपमानार्थनिबंधनमेव। यदाह। अपिचास्त्यनुमानेपिसादृश्यंलिं
गलिंगिनोः॥पदेनयत्रकुब्जेनकुब्जः पादोनुमीयते॥प्रतिबिंबंयथा॥दर्पणेचपरिभोगदर्शिनाप्टष्ठतः
प्रणयिनोनिषेदुषः॥वीक्ष्यबिंबमनुबिंबमात्मनः कानिकान्यपिचकारलज्जया॥ अत्रेयदानायदेवसंबं
धग्रहः कीदृशंसमुखंयादृशमादर्शेप्रतिबिंबंतदालोकनाददृष्टेपिस्वमुखेयेयमीदृशंमेमुखमितिप्र
तिपत्तिस्तदिदमननुभूतार्थविषयंयदापुनरित्थमासोपदेशाद्यादृशंवस्तुतादृशमादर्शादौप्रतिबिं

१५७ बंतरापिप्रियप्रतिबिंबालोकनादिदं तन्ममप्रियप्रतिबिंबमितीयं संज्ञासंज्ञिसंबंधप्रतिपत्तिस्तदप्य
ननुभूतार्थविषयं परानुचित्रादिष्वनुभूतस्वमुखदर्शनायाः प्रतिबिंबदर्शनादनेन सदृशं मेमुखमिति
प्रतिपत्तिर्दृष्टप्रियतमाकारायाश्च प्रतिबिंबाकारदर्शनादेतदाकारो मम प्रेयानिति प्रतिपत्तिः प्रतिबिंब
सन्निधौ प्रतिबिंबोदयो दृष्टस्तदिह संनिहिते न तेन तेन भवितव्यमिति घोव्रीडाविकारभूतस्तदानुभूत
विषयमेतदुपमानं प्रतिबिंबमित्याचक्षते॥ ॥प्रत्यक्षादिप्रतीतोर्थो यस्तथानोपपद्यते। अर्थांतरं च ग
मयात्यर्थापत्तिं वदंति ताम्॥ सर्वप्रमाणपूर्वत्वादेकशोनेकशश्च सा॥ प्रत्यक्षपूर्विकेत्यादिभेदैः षो श्री०
ढा निगद्यते। तासु प्रत्यक्षपूर्विका एकशो यथा॥ निर्णीतुं शक्यमस्तीति मध्यं तव नितंबिनि। अन्यथानु

पपसैवपयोधरभरस्थितेः। अत्रस्तनभरनितंवयोर्मध्यंनोपलभ्यतेस्तनभारावस्थानंचदृश्यतेतत्रेयं
पयोधरभरस्थितिःसान्यथानुपपद्यमानाधारकंमध्यमनुपलभ्यमानंबोधयतिसेयंप्रत्यक्षपूर्विकार्था
पत्तिरेकशएवेहविवक्षिता। इयमपित्वेवंबहुशोभवतियत्रतदर्थापत्तिलब्धंमध्यंतदपिधारणशक्तिमंत
रेणातत्कर्मासमर्थमिति। तस्यापिशक्तिःकल्प्यतेसेयमर्थापत्तिपूर्विकार्थापत्तिः। यश्चायमर्थापत्तिवि
कल्पस्यमध्यस्योपलंभाभावःसोपिप्रकारांतरेणसंभवन्कांतिकार्श्ययोरुत्कर्षंब्रूते। साचेयमभावपूर्वि
कानुपपत्तिर्भवति॥ नचैतदिहशाब्दमपितुवाक्यार्थसामर्थ्याद्गम्यते। प्रत्यक्षादिपूर्विकानेकशोयथा।
एतदालोक्यलोलाक्षिरूपमप्रतिमंतव। कल्पयामःकलातत्त्वगुरुतामादिवेधसः॥ तत्रेदंरूपमप्रतिमंत

१५८

158

वेतिप्रसक्षपूर्वतात्रभावपूर्वताचव्यक्तमेवप्रतीयतेतेनेयमनेकधाः अत्रापियेयंरूपस्याप्रतिमतान्यथानु
पपद्यमानाकलातत्वगुरुविनिर्मितत्वमात्मनोवस्यापयतिसोर्थस्पहल्यारिरूप्योयमानज्ञानपूर्विकायात
त्कर्तुरर्थापत्तिकल्पिताकलातत्वगुरुतासापितथाविधशक्तिकल्पनापूर्विकेति उपमानपूर्विकार्थाप
त्तिपूर्विकाचेयमर्थापत्तिःसापितत्कर्तुर्वैधमतःकलातत्वगुरुतातथाभूतशक्त्याधारतावासाप्यनुमानत
आगमतोवाज्ञातस्यकल्पतइत्यनुमानपूर्विकाचेयमर्थापत्तिःनचैतच्चतुष्टयमिहापिशाब्दमपितुवाक्यार्थ
सामर्थ्याद्गम्यते॥एकशोनुमानपूर्विकायथा॥कपोलपुलकेनास्याःसूचितोमदनज्वरः मनोनिरंतरास
क्तंसखव्यःकथयतिप्रिये॥अत्रयोयंकपोलपुलकेनानुमीयमानोनामनोभवज्वरःसमनसःप्रियेनिरंतरा

श्रीः
१५८

सक्तिमंतरेणानुपपन्नइत्यनुमानपूर्विकेयमर्थापत्तिः॥अनेकशउपमानादिपूर्विकायथा॥त्वदास्येंदुसमोदृष्टा
तदिदंकल्पयामहे॥अन्योन्यगामिलावण्यमनयोरेवकेवलम्॥अत्रत्वदास्येंदुसमोदृष्टइत्युपमानपूर्वकता
अर्थापत्तेःप्रत्यक्षपूर्वताचशब्दतएवप्रतीयते॥याचमिथःसादृश्यानुपपत्तिलभ्यालावण्यान्योन्यगामितासा
पितथाविधंविधातारमंतरेणनसंगच्छतइत्यादीहापिपूर्ववद्वाक्यार्थसामर्थ्यतोवगंतव्यम्॥एकशोऽभावपूर्वी
यथा।एतदास्यंविनाहास्यंनिवेदयतिसुभ्रुवः।प्रियापराधदंडानांमनोभाजनतांगतम्।अत्रसुभ्रूवदनस्य
नेनविलासवस्याःसमस्तशास्त्रलक्षणायोगोलक्ष्यते।तथाविधायाश्चवक्त्रेविलासहासस्याभावोनुपपद्यमा
नःशोकव्यतिरिक्तमात्मकारणंकल्पयतीत्यभावपूर्विकेयमर्थापत्तिः।अनेकशार्थापत्त्यादिपूर्विकाय

१४९ था॥ दृष्ट्वा विभ्रमिणीमेतां विभ्रलीलागुरुं स्मरम्॥ स्मरं च मृगशावाक्ष्या मनस्यस्याः कृतास्पदम्॥ अत्र विभ्रमि
णीति प्रशंसायां नत्वर्थीयस्तेन विभ्रमाणामुत्कर्षो लक्ष्यते तेन चान्योपदेशादसंभवं तो मन्मथमुपाध्यायं बो
धयंतितस्याः अतः पार्श्वतो वानुपलभ्यमानस्य तन्मनस्यवस्थानं लक्ष्यते सेयमाद्या प्रत्यक्षपूर्विका द्वितीया चा
र्थापत्तिपूर्विकार्थापत्तिर्भवति॥ अयमेव च मनोभूर्मनसिकामिनीनां संभवतीति आप्तोपदेशादागमपूर्वि
कापि भवति॥ ॥असत्तायापदार्थानामभावः सोभिधीयते। प्रागभावादिभेदेन स च षड्विध इहेष्यते। तेषु प्रागभा
वो यथा॥ सग्गं अपारिजाअं कोत्थुहलच्छीविरहिअं महुमहस्स उरम्। सुमरामि महणपुरओ अमुद्ध श्री० १४९
अंदं च हरजडापब्भारं॥ प्रध्वंसाभावो यथा॥ धृतिरस्तमिता गतिश्च नाविगमं गेयमृतुर्निरुत्सवः॥ गतमा

भरणप्रयोजनं परिभ्रष्टं शयनीयमद्य मे। इतरेतराभावो यथा॥ कर्णोत्पलं न चक्षुस्तेन च चक्षुः श्रवणोत्प
लम्॥ इति ज्ञानन्नपि जनो मन्यति नेत्रदीर्घताम्॥ असंताभावो यथा। जंजस्स होइ सारं तं सो देइ त्ति कि—रं। अ
णहो त्तं पि हु दिसं तद्दोहग्गं सवत्तीणम्॥ अन्ये पुनरन्यथा असंताभावमाचक्षते। यथा। प्रसीद सद्यो मुंचे
मं चंडि मानं मनोगतम्॥ दृष्टमात्रे पि ते तत्र रोषः खकुसुमायते। सामर्थ्याभावो यथा॥ मानुषीषु कथं वा स्या
दस्य रूपस्य संभवः। न प्रभातरलं ज्योतिरुदेति वसुधातले। न एते षडपि निगदैरेव व्याख्याताः॥ अभावा
भावोप्यभाव एव। तत्र प्रागभावो यथा। नमस्यल्लोकस्त्रिदिवात्महीयते म्रियेते नाग्रपरिवल्लभोजनः। प्र
+भावप्रध्वंसो यथा। उद्यानसहकाराणामनुद्भिन्नानमंजरी। देयः पथिकनारीणां सतिलः सलिलांजलिः॥

१५० प्रध्वंसप्रागभावोयथा।।नमर्त्यलोकस्त्रिदिवात्प्रहीयतेम्रियेतनाग्रेयदिवल्लभोजनः।प्रध्वंसप्रध्वंसोयथा।।निहृ
त्तमेवत्रिदिवप्रयोजनंमृतःसचेज्जीवत्तएवजीवति।प्रध्वंसप्रागभावप्रध्वंसोयथा।।नामिलितमस्तिकिंचित्कां
चीदेशस्यसर्वथानाथ।प्रसरतुकरस्तवायंप्रकृतिशेमध्यदेशेपि।प्रध्वंसप्रध्वंसस्यप्रध्वंसोयथा।।एषाप्रवासंक
थमप्यतीस्ययाता।पुनःसंशयमन्यथैव।।कोनामपाकाभिमुखस्यजंतोर्द्वाराणिदैवस्यपिधातुमीष्टे।।इतरेतरा
भावाभावोयथा।।शासनेपिगुरुणिव्यवस्थितंकृत्यवस्तुनिनियुंक्ष्वकामतः।।त्वत्प्रयोजनधनंधनंजयादन्यएष
इतिमांचमावगाः।।अत्यंताभावस्यसामर्थ्याभावस्यचप्रध्वंसाभावोयथा।।अनामपुण्योपचयैर्दुरापाफल श्री०
स्यनिर्धूतरजाःसवित्री।।तुल्याभवद्दर्शनसंपदेषाहृष्टेर्दिवोवीतबलाहकायाः।।एतेनातिदुर्बोधाइतिनव्याकृताः१५०

॥ ॥छ॥ अर्थालंकृतयोप्येताश्चतुर्विंशतिसंख्यया॥ कथिताः काव्यवित्तानां चित्तप्रह्लादहेतवे॥२४॥ ॥इति श्रीम
हाराजाधिराजश्रीमद्भोजराजविरचिते सरस्वतीकंठाभरणे अर्थालंकारनिर्णयो नाम तृतीयः परिच्छेदः॥३॥ शब्देभ्यो
यः पदार्थेभ्य उपमादिः प्रतीयते। विशिष्टोर्थः कवीनां ता उभयालंक्रियाः प्रियाः॥ उपमारूपकं साम्यं संशयोक्ति
रपह्नुतिः। समाध्युक्तिः समासोक्तिरुत्प्रेक्षाऽप्रस्तुतस्तुतिः॥ सतुल्ययोगितोलेशः ससहोक्तिः समुच्चयः॥ साक्षे
पोऽर्थांतरन्यासः सविशेषापरिष्कृतिः॥ दीपकक्रमपर्यायातिशयश्लेषभाविकाः। संसृष्टिरिति निर्दिष्टास्ताश्चतु
र्विंशतिर्बुधैः॥ ॥तत्र। प्रसिद्धेरनुरोधेन यः परस्परमर्थयोः। भूयोवयवसामान्ययोगः सेहोपमा मता। एकाभि
धीयमाने स्यात्तुल्ये धर्मे पदार्थयोः। प्रतीयमानेप्यपरा द्विविधापि च सा त्रिधा। पदवाक्यप्रपंचाख्यैर्विशेषैरु

=उपसुरमिवमुखमितादावलंकारसर्वस्वाचरणायाः प्रसिद्धेरिति २

यं ते विसकिसलयकोमले भुजा जनिके जघनस्थली च स्तुरविनवयौलशिला विशाले ति॰ अत्रेंदुरिव सुंदरमिंदुसुंदर

१५१ पपद्यते। पृथगष्टविधत्वेन ताश्चतुर्विंशतिः पुनः॥ समासात्मस्य पाश्चैव द्विविधास्यात्सदोपमा॥ या समासोपमा तत्र च

151 तुर्द्धा सा विभिद्यते। इवार्थांतर्गते रेका सामान्यांतर्गतेः परा। अंतर्भूतो भयार्थान्या सान्या सर्व समास भाक्॥

तास्वंतर्भूते वार्था यथा॥ मुखमिंदुसुंदरमिती वार्थः उपमानानि सामान्य वचनै रिति समासे नैवोक्तः॥ एवं

विसकिसलयइव कोमले। शैलशिलेव विशालेति। सेयमंतर्गतेवार्था नाम समासोपमास्तु पदोपमा भक्तिः

च अंतर्भूत सामान्या यथा॥ चंदसरिसं मुहं से अमअसरिछो अमुहरसो विस्सो सकअग्गाहरहस्सुज्जल चुंब

णंकस्स सरिसं से॥ अत्र चंद्रेन सदृशं चंद्र सदृशं मुखं। अमृतेन सदृक्षोऽमृत सदृक्षो मुखरस इति समासे सुं श्री°

दरमधरादि सामान्य शब्दप्रयोगो न श्रूयते॥ प्रतीयते च सदृशा देर्द्योतकादिति सामान्य धर्मस्य सौंदर्यमाध १५१

चंद्र सदृशं मुखमस्या अमृत सदृक्षश्च मुखरसस्याः। सकचग्रह रभसोज्वल चुंबनकेस्य सादृशमस्याः॥ २= सादृश्यस्य प्रतियोगि तया तक्मान के ह मेव घोतकत्वमित्यर्थः॥ १=

कमलकरारंभोरूः कुवलयनयना मृगांकवदना च कथं तु नवचंपकांगी मृणालबाहुः प्रियाऽऽनयति २

र्यादेरुपमानेऽप्रसिद्धस्योपमेये समासेनैव प्रतिपादितत्वादियमंतर्भूतसामान्यानामसमासोपमासु पदोप
माभक्तिः॥ अंतर्भूतोभयार्थायथा॥ कमलकरा रंभोरू कुवलअणअणा मिअंकवअणा सा। कह णु णवचंपअंगी
मुणालबाहू पिआ तवइ॥ अत्र कमलमिव ताम्रौ रंभेव पीवरौ कुवलयमिव श्यामे मृगांक इव प्रेक्षणीयं नवचंपक
मिव गौरं मृणालमिव कोमलौ करावूरू नयने वदनमंगं बाहू यस्याः सा तथोक्तेत्यन्यपदार्थेन समासेनैव द्योतक
सामान्ययोरुक्तत्वादियमंतर्भूतेव सामान्यानामसमासोपमासु पदोपमाभक्तिः। सर्वसमासा यथा॥ शरदिं
दुसुंदरमुखी कुवलयदलदीर्घलोचना सा मे। दहति मनः कथमनिशं रंभागर्भाभिरामोरूः। अत्रोपमानोपमे
यधर्माणामिंदुसुंदरादिपदैरिवार्थस्य समासेनैवाभिधानं सर्वसमासे स्यादिति सर्वसमासोपमेयं समासा

= सर्वः समासोऽस्यामिति समासे विवक्षितार्था [illegible] अभयत्वस्य तत्राह सर्वसमासे स्यादिति १२

१५२ पमास्तुपदोपमाभक्तिः॥ ॥याप्रत्ययोपमेत्युक्ता काव्यविद्भिः पदोपमा॥ चतुर्द्धा भिद्यते सापि प्रत्ययार्थप्रभेदतः
॥प्रत्ययोत्र उपमेये स्यादुपमानेपि कश्चन॥ तत्सामान्ये भवेत्कश्चित्कश्चिदिवार्थे कश्चिदिष्यते। तेषां वशात्तदुपमाभ
152 वेत्तद्व्यपदेशभाक्। उदाहरणमेवास्या रूपव्यक्तौ निदर्श्यते। तत्र प्रत्ययस्योपमेयस्यार्थे यथा। हंसो ध्वांक्षविरा
वी स्यादुष्ट्रक्रोशी च कोकिलः॥ खरनादी मयूरोपि त्वं चेद्वदसि वाग्मिनि। अत्र कर्त्र्युपमान इत्यनेन पदोपमा
न उपपदे ध्वांक्षरवविरावीति सामानाधिकरण्येन कर्तर्येव प्रत्ययः। तदोपमेयस्यार्थे भवति। एवमुष्ट्रक्रोशी ख
रनादीत्येतयोरपि द्रष्टव्यं। सेयमुपमेयार्थप्रत्यया नाम प्रत्ययोपमास्तु पदोपमाभक्तिः॥ प्रत्ययस्योपमा श्री० १५२
नार्थे यथा॥ पूर्णेन्दुकल्पवदना मृणालीदेश्यदोर्लता॥ चक्रदेशीयजघना सा स्वर्गेपि न दृश्यते। अत्र पू

२ उपमेन्दौ इति। अयं भावः। ईषदसमाप्तौ कल्पबादेशीयदेश्यबवो विधीयमाना उपमानपदग्रहणनिमित्तमेव न्यूनताभिधायिनः। ईषन्न्यूनपूर्णेन्दुतुल्यवदनमित्यादि। तथा चोपमानधर्मगतार्थविशेषवाचकत्वात्कल्पबादीनामुपमानार्थत्वमितीदमुक्तमिति। २

रौंदुरिव पूर्णेन्दुरित्यादिकयोपचारवृत्त्या यद्यपि पूर्णेन्दुप्रभृतय उपमानशब्दा अप्युपमेयेषु वदनादिषु वर्त्तंते
तेभ्यश्च यद्यपि स्वार्थ एव स्वार्थिकाः कल्पबादयो भवंति। तथापि ते शब्दशक्तिस्वाभाव्याद्गुणभूतमुपमाना
र्थमात्रं ब्रुवते। यथा शुक्लादिभ्यस्तरबादयः। तथा ह्ययं शुक्लोयं च शुक्लोयमनयोः शुक्लतर इत्युक्ते शौ
क्ल्यस्यैव प्रकर्षो गम्यते। न शौक्ल्यवतः। सेयमुपमानार्थप्रत्ययानामप्रत्ययोपमास्तुपदोपमाभक्तिः॥ सामा
न्यार्थप्रत्ययेन यथा। स्त्र्यीपति सुधारश्मिं मन्मथोस्य मृतायते। मृतस्य कांताविरहे स्वर्गेपि नरकीयति। अत्रो
पमाना[redacted]दाचारक्यसादिभिः स्त्र्यादिभ्यः क्यजादयश्चाचारलक्षणक्रियावि
शेषं द्योतयमाना उपमानोपमेययोः सामान्यमेवोत्पद्यंत इति सेयं सामान्यार्थप्रत्ययानामप्रत्ययोपमास्तु

= सामान्यवाचकमिति स्त्र्यीपति इति। उपमानादाचारे इति क्यच्। सुधारश्मिं चन्द्रं मन्मथः कर्ता अस्य कांताविरहे जीवतः। मृतायते मन्मथपरत्वेन ... इति भवः। कांताविरहे मृतस्य स्वर्गेपि नरकीयति नरके इवाचरतीति मन्मथपरत्वेन अधिकरणाच्च

= इवार्थ एवेति। तुल्यत्वमात्रप्रयोजकप्रत्ययान्तरस्य वार्थमात्रमिति भावः॥२= इवार्थ एवेति। इवार्थतुल्यक्रियाप्रयोगव्यवस्थः॥२= ननु मास्तु तुल्यक्रियाप्रयोगः किमनिष्टमत आह। तदप्रयोगेपि वतिरिति। तेन तुल्यं क्रिया चेद्वतिरित्यत्र क्रियापदग्रहणं क्रियते न गवा तुल्यो गवय इत्यादौ =
= नक्रियाणामप्यमादिसेव वर्थः। क्रियाप्रयोगान्तर्भावेण गौरिव गौरिव गवय इत्यर्थके गवा तुल्यं गवयो न स्यादि[illegible] वाक्ये गोवद्गवय इति क्रियाप्रयोगरहितादेवतिः स्यादिति भावः॥२=

१५२ परोपमाभक्तिः॥ इवार्थप्रत्ययेन यथा॥ एक एव हि भूतात्मा भूते भूते व्यवस्थितः। एकधा बहुधा चैव दृश्यते जल
चंद्रवत्॥ अत्र तेन तुल्यं क्रिया चेद्वतिरित्यनेन चंद्रशब्दाच्चंद्रेण तुल्यं दृश्यत इतीवार्थ एव प्रत्ययो न तु तुल्यक्रि
यार्थे अन्यथा दृश्यत इति इवार्थ एव तुल्यक्रियाप्रयोगोपि न स्यात्। तदप्रयोगेपि च गोरिव गवय इत्यादौ वतिः प्र
सज्येत॥ सिषमिवार्थप्रत्ययानामप्रत्ययोपमा तु पदोपमाभक्तिः॥ ॥वाक्योपमा तु पात्रैद्वैविध्यं सापि गच्छति
।एका पदार्थयोः साम्ये परा वाक्यार्थयोर्मिथः॥ आद्या पूर्णा च लुप्ता च लुप्तपूर्णा तथैव च। पूर्णा लुप्तेति चाख्या
ता कविमुख्यैश्चतुर्विधा॥ तत्र। पूर्णा सामान्यधर्मस्य प्रयोगे द्योतकस्य च। उपमानस्य च भवेदुपमेयस्य चैव श्री०
वहि। यथा। कमलमिव चारुवदनं मृणालमिव कोमलं भुजायुगलम्॥ अलिमालेव सुनीला तथैव मदि १५२

153

रेक्षणोकवरी॥ अत्र कमलमृणालालिमालादीनामुपमानद्योतकतुल्यधर्मोपमेयवाचकानां चतुर्णामपि पदानां पृथक्पृथक्प्रयोगे पदार्थयोः सादृश्यस्याभिधीयमानत्वादियं पूर्णा नाम पदार्थोपमा सुवाक्योपमा भक्तिः॥ लोपे सामान्यधर्मस्य द्योतकस्य च योपमा। प्रतीयमानसादृश्ये द्वयोर्लुप्तेति तां विदुः॥ यथा। न पद्मं मुखमेवेदं न भृंगौ चक्षुषी इमे। न केसराणि कांतायाः इमास्ताः दंतपंक्तयः॥ अत्र कांतामुखादावुपमेये पद्मादिविपर्ययज्ञानप्रसाख्यानेन इवादीनामभावे पि कांत्यादिलुप्तधर्मप्रतीते लुप्ता नामेयं पदार्थोपमा सुवाक्योपमाभक्तिः॥ ॥लोपे सामान्यधर्मस्य लुप्तपूर्णेति गद्यते। यथा। राजीवमिव ते वक्त्रं नेत्रे नीलोत्पले इवारंभास्तंभाविवोरू चक्रकुंभाविव स्तनौ॥ अत्र सामान्यधर्मे लुप्ते पि प्रतीयमानसादृश्यादेव पदार्थयो रु

=नपद्मादिविपर्ययज्ञानमिति। पद्मादेर्योवि[redacted]पर्ययः तदभाववति तत्प्रकारकं तत्क्षणज्ञानं प्रसाख्यानेन निषेधेन सर्पः। विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठमिति पातंजलसूत्रं। विपर्यय इति लक्ष्यनिर्देशः। मिथ्याज्ञानमिति लक्षणं। मिथ्याज्ञानमिति समर्थविव
=रणमतद्रूपप्रतिष्ठमिति। तदभाववति तत्प्रकारकमि[redacted]ति तत्त्वार्थः। अयंभावः (स्य) सामान्यधर्मो ...विपर्ययज्ञानस्य मुखमेवेदं रूपस्य प्रसाख्यानेनापात्मकुर्वन्निदृष्ट्वापि तत्रूपसादृश्यसामान्यधर्म

=तैनेमिः उपमानधर्मस्योपमेये आरोपात् ह्स्वदीर्घादिताने चेत्यनिर्दिष्टफुल्लेसुरभिगंधिनीद्रमेपुंडरीकेदति तत्र श्लेषालंकारः ॥ ततोन्यत्वेतंत्रेणानभिधाने श्लेषाभावे समतिप्रसक्तो शब्दरोतुल्यवदेकयान्वयलक्षणे नेतवेनयोगेन साध्यमस्याश्लेषादुपमा पमे

१५४ पमानोपमेयभावस्यपरिपूर्णत्वेलुप्तपूर्णानामेयंपदार्थोपमासुवाक्योपमाभक्तिः॥ ॥द्योतकस्यतुल्लोपेयाप्पूर्णा

लुप्तेतिसास्मृता॥यथा।त्वन्मुखंपुंडरीकंचफुल्लेसुरभिगंधिनी॥कोमलापाटलोतन्विपल्लवश्चाधरश्चते।अत्र

तंत्रेणसदृशयोरनभिधाना[उपमानोपमेयपुंडरीकयो]रुपमानोपमेयभावविवक्षा।तेनश्लेषतोन्यत्वेसतीतरेतरयोरे

नोपमानोपमेययोरेकशेषेणचतद्विशेषणयोः समुदायेनाभिधानादिवादिमंतरेणापिउपमानादीनां

चतुर्णामपिपूर्णत्वेसत्यैकार्थत्वादिवादिर्लुप्यतइतिपूर्णलुप्तानामेयंपदार्थोपमास्तुवाक्योपमाभक्तिः श्री: १५४

॥यातुवाक्यार्थयोःसापिचतुर्द्वैकेवशब्दिका।नैकेवशब्दिकेवाक्ष्मिन्यावैधर्मवत्यपि॥तास्विकेवश

ब्दायथा।पांड्योयमंसार्पितलंबहारः कॢप्तांगरागोहरिचंदनेन।आभातिबालातपरक्तसानुः स

वाक्यार्थयोरेवकाम्यितत्वादेकेनेवशब्देनतयोः परस्परमुपमानोपमेयभावोभिहितस्तथैकेवशब्दानाम॥

निर्झरोद्गारइवाद्रिराजः॥ अत्र हिमवत्सांद्ययोर्निर्झरहारयोर्बालातपहरिचंदनयोश्च परस्परमुपमानोप
मेयविवक्षायां विशेषणविशेष्यभावपरिकल्पनेनैवाक्यार्थोपमास्तु वाक्योपमाभक्तिः॥ अनेकेवशब्दा यथा
॥ दिनेदिने सापरिवर्द्धमानाल्लब्धोदया चांद्रमसीवरेखा॥ पुपोषलावण्यमयान्विशेषान्ज्योत्स्नांतराणीवक
लांतराणि॥ अत्र क्रियापदस्यवाक्य द्वयैकतापत्तिहेतोः सकर्मकत्वात्कर्तुःकर्मणश्चोपमानात्त्वंथगि
वशब्दप्रयोगइतिसेयमभिधीयमानसादृश्याऽनेकेवशब्दानामवाक्यार्थोपमास्तुवाक्योपमाभक्तिः॥ अ
निवादिशब्दा यथा॥ दिग्गोजागर्तिरक्षायैपुलोमारिर्भुवोभवान्॥ असुरास्तेनहन्यंतेसावलेपान्नृपास्त्वया॥
अत्र पुलोमारिवर्णनीययोर्दिवाभूम्योरसुराणामवलिप्तपार्थिवानां च तुल्यक्रियासमावेशादिवादिमंतरे

=णपदस्यपुपोषेत्यस्यःवाक्यद्वयस्यःप्रयार्थोपमानोपमानोपमेयोभयवोधकस्यैकतापत्तोर्हेतोरित्यर्थः॥४ = इवशब्दप्रयोगइति॥ अत्रविशेषणविशिष्टयोर्द्वयोः परस्परमुपमानोपमेयभावस्तत्रैकेवशब्देनविशेषणविशेष्ययोरुभयोरुपकारः संभवे=
=न्नपदस्यमभिवर्षे भयोस्तेकक्रियान्वयिनोः कर्तृकर्मणोरेकेनेवशब्देनानुग्रहोनसंभवतीतिपृथगिवशब्दप्रयोगावश्यकइतिभावः॥ = तुल्यक्रियासमावेशरूपात्तेनतद्रूपातस्याः समावेशः साधारणधर्मसंबंधरूपस्तस्मात्ताहश्याक्षेपकादित्यर्थः॥ =

१५५ णापिवाक्यार्थानांपरस्परमुपमानोपमेयभावोवगम्यतइतीयमनिवादिशब्दानामवाक्योर्थोपमास्तुवाक्यो
पमाभक्तिः॥वैधर्म्यवतीयथा॥महितःप्रधनायमाधवानहमाकारयितुंमहीभुजा॥नपरेषुमहौजसश्छलाद
155 पकुर्वंतिमलिम्लुचाइव॥अत्रसमस्तेषूपमानेसत्स्वप्युपमेयेसत्यपिचेवशब्दे महौजसांमलिम्लुचानांच
योयंछलापकरणंनामवस्तुधर्मःसउपमानएवनत्रानियम्यतइतिवैधर्म्यवतीनामेयंवाक्यार्थोपमास्तुवा
क्योपमाभक्तिः॥ ॥यत्रोक्तिभंग्यावाक्यार्थसादृश्यमवगम्यते।वाक्यार्थयोर्विस्तरतःसाप्रपंचोपमेष्यते।सा
तुप्रकृतरूपास्याद्रूपेणाविकृतातथा॥तयोःप्रकृतरूपासाविज्ञेयाचचतुर्विधा॥स्यात्समस्तोपमातद्वदेकदे श्री०
शोपमापरा॥मालोपमातृतीयास्याच्चतुर्थीरसनोपमा॥तासुसमस्तोपमायथा॥अलिवलयैरलकै १५५

रिवकुसुमस्तबकैः स्तनैरिवबसंते। भांतिलताललनाइवपाणिभिरिवकिशलयैरधिकम्॥ अत्रवसंतलक्ष्मी
परिष्कृतलतानांललनानांचप्रतीयमानसादृश्यानामुपमानोपमेयभावविवक्षायांयेयमलिवलयादिभि
रलकादीनांप्रतीयमानसादृश्यानामेवपृथक्पृथगिवशब्दप्रयोगवतीतिविस्तारेणावयविनोवयवानां
चेतिसामस्त्येनवाक्यार्थयोरौपम्यभंगिः॥ सेयंसमस्तोपमानामप्रकृतरूपोपमास्तुप्रपंचोपमाभक्तिः
।एकदेशोपमायथा॥ कमलदर्धरैरिवदशनैरिवकेसरैर्विराजंते। अलिवलयैरलकैरिवकमलैर्वृंद
नैरिवनलिन्यः। अत्रनलिनीनांविलासिनीनांचपरस्परमुपमानोपमेयभावेवक्तव्येविलासिनील
क्षणामुपमानार्थमेवावयवांतराणिचयानिस्तनाद्युपमेयानितानिपरित्यज्यकमलमेवैकंतद्व

=शोभैवलक्ष्मणमुखंववनमालेयविकटं हरिपतेरुवः ॥ कीर्तिरिव पवनतनयं आश्लेषवशात्यस्मापि गजाति ह्यक्षि ॥ २ =

१५६ यथैवैरल्लादिभिः सहाधरादिभिरुपमानैः पृथक्पृथगिवप्रयोगाद्विस्तरेणोपमितं तेनेयमेकदेशोपमाना
मप्रकृतरूपोपमास्तुप्रपंचोपमाभक्तिः ॥ मालोपमा यथा ॥ सोऽहंबलवत्वण मुहंवणमालच्छविच्छ उंतदिवहूम
उरं · कित्तिवपवणतणअंआणव्ववलाइंसेविलग्गादिट्ठी · अत्र रामहृद्ये लक्ष्मणमुखादिभिर्विन्यासः शोभाद्युपमानमालयामतीयमानसादृश्यापादृष्टे विस्तरेणोपमितेमाला
पमानामेयंप्रकृतरूपोपमासुप्रपंचोपमाभक्तिः । रसनोपमा यथा · चंद्रायते शुक्लरुचापि हंसो हंसायते चारुगतेन कान्ता · कान्तायते स्पर्शसुखेन वारि वारीयते स्वच्छतया
विहायः ॥ अत्र चंद्रादीनां शुक्लादिभिरभिधीयमानसादृश्यैर्हंसादिभिर्यद्रसनाक्रमेणोपश्लाघनया विस्तरवती हेतुमती च प्रत्यपोपमापंक्तिः तथैहैकवाक्यताकरणे
नरशनेव मणीयता वर्णनमिति सेयं रसनोपमानाम प्रकृतरूपोपमासु प्रपंचोपमाभक्तिः ॥ प्रतीमास्त्वाश्वतस्त्वोपि रूपेण प्रशंसेन यथा ॥ उपमायाश्च तस्त्वोन्याविकृतेन प्रकाश
ते · विपर्यासोपमानासु प्रथमा यथा भयोपमा · अप्योसायोपमानामनुत्तरीयानन्वयोपमा · तासु विपर्यासोपमा यथा · पतन्ति चन्द्रमा नकांति सलिलेमृणंतनदिदीववंमेथैवं तदितः प्रियं
तवमुखच्छायानुकारी शशी · पेपिहमनानुसारिगतयस्तेराजहंसागतास्त्वत्सादृश्यविनोदमात्रमपि मे दैवेन न क्षम्यते · अत्र नेत्रादीनामुपमेयत्वमिंदीवरादीनामुपमानत्वमि
ति प्रसिद्धोयं यमसनानुरागान्नेत्रादिष्वाधिक्यबुद्धिर्नासनुरागादिंदीवरादिषु तत्कारणबुद्धिमायोः मानेणविरहिणामभिधीयमानसादृश्यानामभीष्टापरस्परमुपमानोपमेयभावः प्रसिद्धविपर्या
सेनकल्पितइतिविपर्यासोपमानामविस्तरतरूपोपमासुप्रपंचोपमाभक्तिः ॥ उभयोपमा यथा · नवाननमिवांभोजमंभोजमिवतन्मुखं · निलीनामजिनीषंडे कथं नुतिल्लभेमहि · अत्राप्यसंतसादृश्यादेकास्मिन्पक्षेप्रसिद्धे विपर्यासद्वितीये
यप्रतीयमानसाधर्म्योभयोपमानामविस्तृतोपमासुप्रपंचोपमाभक्तिः ॥ उत्साद्योपमा यथा · उभौ यदि व्योम्नि पृथक्प्रवाहावाकाशगंगापयसः पतेतां श्री० १५६

र्तिरिवमत्र

तामातद्रोपमीयेततमालनीलमामुक्तमुक्तालतमस्यवक्षः।अत्रोपमानार्थमुत्पाद्योपमेयेनप्रतीयमान
मभिधीयमानंवसादृश्यमभिहितमितिसेयमुत्पाद्योपमानामविकृतरूपोपमास्तुप्रपंचोपमाभक्तिः।
अनन्वयोपमायथा।त्वन्मुखंत्वन्मुखमिवत्वदृशौत्वदृशाविव।त्वन्मूर्त्तिस्त्वत्तंमिवत्वंकृशोदरि।अत्र
त्वमेवेदृशीनान्यात्वत्सदृशीत्यनन्वयेसतिउपमानोपमेयभावविवक्षयैकस्यापिवस्तुनोभेदमुपकल्प्यप्रतीय
मानसादृश्यमौपम्येनाभिहितमितिसेयमनन्वयोपमानामविकृतरूपोपमास्तुप्रपंचोपमाभक्तिः॥ ॥यदोपमा
नशब्दानांगौणवृत्तिव्यपाश्रयात्॥उपमेयेभवेद्वृत्तिस्तदातद्रूपकंविदुः॥शब्दार्थोभयभूपिष्ठभेदात्त्रेधात
दुच्यते।शब्दभूपिष्ठमेतेषुप्रकृतविकृतंतथा।अर्थभूपिष्ठमप्याहुःप्राधान्येंगंगयोर्द्विधा।द्विधैवोभयभू

१५८ पिष्वंश्च द्वसंकीर्णभेदतः। चतुर्द्धाप्रकृतं तेषु शब्दभूपिष्ठमुच्यते॥ समस्तं व्यस्तमुभयं सविशेषणमित्यपि॥ तेषु
157 समस्तं यथा॥ पाणिपद्मानि भूपानां संकोचयितुमीशते॥ त्वत्पादनखचंद्राणामर्चिषः कुंदनिर्मलाः॥ अत्रो
पमितं व्याघ्रादिभिः सामान्याप्रयोग इति समासे पद्मानीव पद्मानि चंद्रा इव चंद्रा [redacted] इत्यभेदोपचारेणो
पात्तसादृश्यासाणीनां नखानां च पद्मचंद्रादिभिरभिधाने सामान्यवादिशब्दाप्रयोगादुपमानार्थस्तिरो
भूत इति सोयं गौणशब्दव्यपाश्रयः समासहेतुकः समस्तरूपं नाम प्रकृतरूपकेषु शब्दभूयिष्ठरूपकभेदः॥ व्य
स्तं यथा॥ अंगुल्यः पल्लवान्यासन् कुसुमानि नखार्चिषः॥ बाहूलते वसंतश्रीस्त्वन्नः प्रत्यक्षचारिणी॥ अत्र १५०
त्रापि पूर्ववत्पल्लवकुसुमलतावसंतश्रीशब्दानां गुणवृत्त्याश्रयेणांगुलीनखार्चिर्बाहुवर्णनीयनायिकाभिः
कं३

सहसामानाधिकरण्यात्सामान्येवादिशब्दाप्रयोगाच्चतिरोभूतेष्वुपमानार्थेसमासोनक्रृतश्त्यसमस्त
कं.२ रूपंनामप्रकृतरूपकेषुशब्दभूयिष्ठरूपकभेदः॥समस्तव्यस्तंयथा॥स्मितंमुखेंदोर्ज्योत्स्नातेप्रभांबु
कुचकुंभयोः।दोर्लतापल्लवेपाणौपुष्पंसखिनखार्चिषः॥अत्रमुखेंदोः स्मितमेवज्योत्स्नाकुचकुंभयोः
प्रभैवांबुदोर्लतयोःपल्लवभूतेपाणौनखार्चिषएवपुष्पमितिसमस्तानामसमस्तानांचगौणशब्दानामु
पमातिरस्कारेणादर्शितत्वादिदंसमस्तव्यस्तरूपंनामप्रकृतरूपकेषुशब्दभूयिष्ठरूपकभेदः॥सविशेष
णंयथा॥हरिपादःशिरोलग्नजह्नुकन्याजलांशुकः॥जयत्यसुरनिःशंकसुरानंदोत्सवध्वजः॥अ
त्रयथोक्तविशेषणविशिष्टोयोहरिपादःयश्चहरिहतासुरेभ्योनिःशंकानांसुराणामानंदोत्सवेध्व
=शिरोलग्नंजह्नुकन्यागलमेवांशुकंयस्य पताकास्थानीयंयस्यसहरिविशेषणविशिष्टः।१=

=उपमानस्तदध्वजौ ... योपस्कारकरकेन ... कृत्या ... रूपोपमेयविशेषणेनोपमानोपमानोपमेययोः सादिशेषणत्वमित्यर्थः।१=

१५८ 148 जस्तयोः सविशेषणयोरेव प्रतीयमानसादृश्ययोः परस्परमुपमानोपमेयभाव इति सविशेषणं नाम प्रकृत

रूपकेषु शब्दभूयिष्ठरूपकभेदः। तदेतच्चतुष्टयमपि प्रकृतसमासादिशब्दैर्निबद्धमिति प्रकृतमुच्य

ते॥ ॥चतुरो विकृतस्यापि प्रभेदान्प्रतिजानते॥ परंपरार्थरशना मालारूपकरूपकम्॥ तेषु परंपरा

यथा॥ वववसाअरइप्पओ सोरीसगइंददिढसिंखलापडिवंधो। कहकहविदासरहिराजअकेस

रिपंजरो गओ द्युणा समओ। अत्र दाशरथिसंबंधिनो व्यवसायस्य रविराणा राघवस्य गजेंद्रराजयस्य केस

रिणा सहोपमानोपमेयभावकल्पनया यदेकं रूपणं तथैव तत्संबंधितया प्रदोषशृंखलाप्रतिबंधपंजरा १५९

णां द्वितीयं तत्त्रयाणामपि घनसमयेन तृतीयं। तेनेयं रूपकपरंपरा नाम विकृतरूपकेषु शब्दभूयि

=व्यवसायरविराघवयोर्गजेंद्र [illegible] दृढशृंखलाप्रतिबंधः। कथंकथमपि दाशरथेर्जयकेसरिपंजरो गतो घनसमयः।१=

षुरूपकभेदः। रशनायथा॥ किशलयकरैर्लतानांकरकमलैर्मृगदृशांजगज्जयति। नलिनीनांकमल
मुखैर्मुखेंदुभिर्योषितांमदनः॥ अत्रकिसलयकरैःकरकमलैःकमलमुखैर्मुखेंदुभिरितिरशनाक्रमेण
शब्दानांसंदर्भउपलभ्यमानस्तदर्थानांमनोभुवोजगद्विजयेलतादिसंबंधात्करणभावमनुमापयती
तिरसनानामेतद्विकृतरूपकेषुशब्दभूयिष्ठरूपकभेदः॥ मालायथा॥ स्वामीदुर्नयवारणव्यतिक
रेशौर्येपिदेशेगुरुर्विस्त्रंभेहृदयंनियोगसमयेदासोभयेचाश्रयः। दातासप्तसमुद्रसीमरशनादामां
कितायाःक्षितेःसर्वाकारमहोस्वयंवरसहत्वोवानकर्णोमम॥ अत्रस्वाम्यादीनांमालोपमादिक्रमेण
निरूपितत्वान्मालारूपकंनामविकृतरूपकेषुशब्दभूयिष्ठरूपकभेदः॥ रूपकरूपकंयथा॥ मु

१५९ खपंकजरंगेस्मिन् भ्रूलता नर्तकी तव। लीलानाट्यामृतं दृष्टौ सखि यूनां निषिंचति। अत्र मुखमेव पंक
जं तदेव रंगः। भ्रूरेव लता सैव नर्तकी। लीलैव नाट्यं तदेवामृतमिति रूपितानामपि रूपणेन समासे स
-159 पक्षरूपकं नामायं विकृतरूपकेषु शब्दभूयिष्ठरूपकभेदः। तदेतच्चतुष्टयमपि परंपरादिभिर्विकृतस
मासादिशब्दैर्निबद्धमिति विकृतमुच्यते॥ ॥समस्तं चासमस्तं च युक्तं चायुक्तमेव च। चतुर्द्धांगिप्रधा
नं स्यादर्थभूयिष्ठरूपकं। तेषु समस्तं यथा। ताम्रांगुलिदलश्रेणि नखदीधितिकेसरं॥ ध्रियते मूर्ध्नि
भूपालैर्भवच्चरणपंकजम्॥ अत्र समस्तोपमायामिव पादाख्यः पंकजाख्यश्चावयवी परस्परमु श्री०
पमानोपमेयभूतः प्रतीयमानोभिधीयमानसादृश्यैरंगुलिश्रेणिनखदीधितिभिर्दलश्रेणिकेस १५
=ताम्रत्वसमस्तांगुल[illegible] प्रतीयमानत्वं [illegible] अभिधीयमानत्वं [illegible] नखदीधितीनां केसराकारत्वं [illegible] प्रतीयमानसादृश्यं केसराणां [illegible] अभिधीयमानसादृश्यं

रैश्वसहसामंस्यिनरूपितस्तद्योग्यस्थानविन्यासेन चार्थस्य प्राधान्यमभिहितमिति समस्तं नाम रूपकमिदमं
गिप्रधानरूपकेष्वर्थं भूपिष्ठरूपकभेदः॥ न चैतद्वाच्यं पाणिपद्मानि भूपानामित्यादेरुदाहरणादिदं न भिद्यत इ
ति। तत्र हि वाक्येन स्वार्चिषां क्रियासमावेशेन प्राधान्यमवगम्यते तेन न स्वचंद्राणां ततश्च न रूपकं। पाणिपद्मेष्व
स्य तु यद्यपि संकोचक्रियायामस्ति समावेशस्तथापि न तानि वर्णनीयत्वेनोपन्यस्तानि। अपि तु जिगीषुभाववर्णा प४
नांगतया। अतः समावेशमात्रमप्रमाणं तत्र पाणिपद्मानां नापि नखचंद्राणामर्थप्राधान्यमपि तु शाब्दप्राधान्य
मेव। इह तु चरणपंकजताम्रांगुलिदलश्रेण्यादिविशेषणविशिष्टस्य भूपालमौलिविनिवेशनेन प्राधान्यं प्रती
यत इति उभयमपि निरवद्यम्। असमस्तं यथा। अकस्माद्देवि ते चंडि स्फुरिताधरपल्लवं। मुखं मुक्तारुचो धत्ते

१६० घर्मांभःकणमंजरीः॥ अत्राप्येकदेशोपमाक्रमेण अधरपल्लवस्वेदांबुकणमंजरीणां सहजाहार्यावयवानाम
भिधानादुपमानावयविनश्चानभिधानादिदमसमस्तं नाम रूपकमंगिप्रधानेष्वर्थभूयिष्ठरूपकभेदः॥ अत्रापि
रवा२ च मुखस्येन्दुः स्फुरिताधरपल्लवमिति विशेषणविशिष्टस्य घर्मांभःकणमंजरीधारणक्रियासमावेशः प्राधा
। न्यं स्यापयति। युक्तं यथा॥ स्मितपुष्पोज्वलं लोलनेत्रभृंगमिदं मुखं। नकस्य नंदनं सुभ्रु सुरभिश्वसितानि
नेत्र२ लं॥ अत्र स्मितपुष्पोज्वलं लोलभृंगं सुरभिश्वसितानिलं ते मुखं नकस्य नंदनमिति पुष्पभृंगादीनां परस्परं युक्त्यु
पपत्तेर्युक्तं नाम पमंगांगिप्रधानरूपकेष्वर्थभूयिष्ठो रूपकभेदः॥ अत्र पद्यपि नंदनमिव नंदनमिति गौणवृत्तिव्य श्री० १६०
पाश्रयः शब्दस्य समस्तविशेषणैः परिक्षिप्यते तथापि नंदयतीति कृदभिहितक्रियासमावेशो मुखाख्यस्यैव
युक्तियोगउपपत्तिश्च नत्र पुष्पैः सह भ्रमराणां योगो मकरंदपानकृतः संबंधः। उपपत्तिस्तु नाभिपुष्पाणि भ्रमरैर्विनाशोभंत इति॥ २२